Postal Regd.No. GAMC- 1553/2025-2027 ISSN 2454-6313

# संस्कृत-साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २३४
ऑक्टोबर - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### कृपया चिन्तयित्वा हसन्तु

हेमचन्द्राचार्यः हास्यस्य विविधान् प्रकारान् वर्णयति। केचन स्मितं कुर्वन्ति, केचन अट्टहासं कुर्वन्ति, केचन अतिहासं कुर्वन्ति, केचन वा अपहासं (निष्कारणं हास्यं) कुर्वन्ति। तत्रापि स्वभावतः भेदः दृश्यते। वयः अपि हास्ये भेदं जनयति। स्त्रीणां हास्यं भिन्नम्। शिशोः अपि भिन्नम्। धनिकस्य हास्यं भिन्नम्। विवशः मनुष्यः भिन्नं हसति। वणिक् क्रेतारं प्रति यत् हसति तत् पूर्णतः धनाश्रितं भवति। परन्तु वेश्यायाः कोमलं स्मितं को विज्ञातुम् अर्हति ?

अथ प्रशंसनीयं हास्यं किम् ? विचारसम्पन्नं निर्दोषं हास्यं चित्तं हरति। तथाविधस्य हास्यस्य आचमनं कुर्मः।

ज्योतीन्द्रः दवे हास्यलेखकेषु एकतमः। पुरातनः कालः। तदानीं समाजे विधवाविवाहस्य प्रचण्डः विरोधः आसीत्। ब्राह्मणेषु तु तस्य प्रभावः विशेषतः दृश्यते स्म। तथापि केचन प्रशिष्टाः सज्जनाः पुरातनीं प्रथां त्याजयितुं प्रयतन्ते स्म। अस्मिन् विवादे पक्षद्वयम् अभवत्– विधवाविवाहविरोधपक्षः, विधवाविवाहमण्डनपक्षः चेति। विवादस्य परिहारार्थं ब्रह्मसमाजेन महती सभा आयोजिता। सभायाः अध्यक्षः आसीत् लेखकः ज्योतीन्द्रः दवे। संवादस्य प्रारम्भः अभवत्। परन्तु मध्येमार्गं संवादः लुप्तः। सकला सभा कलहेन आक्रान्ता। एतां विकटां स्थितिं समीक्ष्य ज्योतीन्द्रः दवे उच्चैः निवेदितवान् – 'भोः बान्धवाः ! धीराः भवन्तु भवन्तः। वयं विधवाविवाहं प्रति चिन्तयितुम् अत्र सम्मिलिताः स्मः, नूतनाः विधवाः निर्मातुं न !' दवेवर्यस्य हास्यगभीरेण एकेन एव वाक्येन सभा स्वस्था अभवत्।

विनोदः भट्टः प्रथितयशाः हास्यलेखकः। तस्य पत्नी नलिनी। भट्टवर्यस्य पौत्रः वयसा लघुः आसीत्, तदानीन्तनी घटना एषा। एतस्य बालकस्य (पौत्रस्य) नलिन्या सह कलहः अभवत्। कलहस्य बीजं तु क्षुद्रम् एव। बालकः पितामहीं नलिनीं सूचितवान् स्यात् यत् भवत्याः ललाटे रचितं तिलकं वक्रम् इव दृश्यते। कुपिता नलिनी पौत्रं शब्दैः ताडितवती। ततः भट्टवर्यः पौत्रम् आहूय, सान्त्वयन् उक्तवान् – 'अहं ताम् उचितैः उपायैः बोधयितुं प्रयत्नं करोमि।' तदा पौत्रः सोद्वेगम् उक्तवान् – 'अलम्। भवान् तां किमपि न वदतु। अन्यथा तस्याः तिलकं मूलतः नष्टं भविष्यति !' (सा भवतः एव वधं करिष्यति इति।)

बुद्धिसम्पन्नानां मनुष्याणां हास्यम् अपि बुद्धिग्राह्यं भवति। तत्र न केवलं हसनम्, अपि तु तेन सह कश्चन सन्देशः अपि संश्लिष्टः भवति।

## सौजन्यम्



पुरा प्रवृत्ता कथा एषा । कल्पकनामकं ‘‘राज्यं कदम्बसेननामको राजा पालयति स्म । कदम्बसेनः उत्तमः सद्गुणी च । अतः समृद्धे तस्मिन् देशे प्रजाः सभ्याः शान्तिप्रियाश्च आसन् । परितः विद्यमानाः राजानः अनेनैव कारणेन राज्ञे असूयन्ति स्म । किन्तु कदम्बसेनस्य सैन्यबलं स्मरन्तः ते भीत्या मौनेनं तिष्ठन्ति स्म।

कदाचित् राज्ञः कदम्बसेनस्य अङ्गरक्षकः मृतः । तदा एषा वार्ता सर्वत्र प्रसृता यत् कोऽपि समर्थः विश्वासयोग्यः पुरुषः लब्धः चेत् तम् अङ्गरक्षकत्वेन राजा नियोजयिष्यति इति । तत्पदाकाङ्क्षिणः अनेके जनाः कल्पकराज्यम् आगताः, राज्यस्य सीमायां स्थितायां धर्मशालायां स्थिताः च । एवम् आगतेषु अङ्गरक्षकस्थानाकाङ्क्षि दण्डपाणिः धूमकेतुश्च तत्पदयोग्यौ इति परीक्षया ज्ञातम् । दण्डपाणिः अतीव तेजस्वी, पराक्रमी, बलवान् च आसीत् ।

धूमकेतुना ज्ञातं यत् दण्डपाणिरेव सर्वेषु विषयेषु मत्तः उत्तमः, अतः अङ्गरक्षकपदं मया न लभ्यते इति । अतः दण्डपाणिं केनापि उपायेन दूरीकर्तुम् इच्छन् सः तदर्थम् एकम् उपायं चिन्तितवान् ।

तदनुगुणं धूमकेतुः दण्डपाणिम् उद्दिश्य – ‘‘मित्र ! अस्मिन् नगरे मम परिचितानां संख्या अधिका वर्तते । अतः अहं सर्वान् दृष्ट्वा त्रिचतुरेषु दिनेषु प्रतिनिवर्तिष्ये । किन्तु तावता मम गृहं मां द्रष्टुं कोऽपि आगच्छेत् । तदा एतत् पत्रं कुशलवार्तया सह आगताय तस्मै देयम्’’ इति उक्त्वा पत्रमेकं तस्मै दत्तवान् । ततः प्रस्थितः धूमकेतुः साक्षात् राजानं द्रष्टुं गतः । राजानं सः एवं निवेदितवान् – ‘‘महाराज ! अहं भवन्तं जागरयितुम् आगतः । भवतः राज्यसीमायां धर्मशालायां कश्चन विदेशीयः गूढचरः निवसति । तस्य नाम दण्डपाणिः इति । सः अङ्गरक्षकपदं प्राप्तुं प्रयतमानः अस्ति । मम वचसि यदि विश्वासः न स्यात् तर्हि मया यथा उच्यते तथा क्रियताम् । तदा भवता एव सत्यांशः ज्ञातः भवेत् । ततः निर्णयोऽपि सुकरः भवेत्’’ इति । ततः सः कञ्चन उपायं राजानम् उक्तवान् । राजा कदम्बसेनः सैनिकान् धर्मशालां परितः गुप्तरूपेण स्थातुं प्रेषितवान् । किञ्चित्कालानन्तरं कश्चन अश्वारोही धर्मशालाम् आगत्य दण्डपाणिं धूमकेतुविषये पृष्टवान् ।

दण्डपाणिः धूमकेतुना दत्तं पत्रं तस्मै अश्वारोहिणे दत्तवान् । अनन्तरक्षणे एव कदम्बसेनस्य सैनिकाः तस्मात् तत् पत्रं बलात् स्वायत्तीकृत्य दण्डपाणिं बद्धवन्तः । तावता सः अश्वारोही कथमपि समयं निरीक्ष्य ततः पलायितः । सः धूमकेतुना प्रेषितः जनः एव । सैनिकाः पत्रेण सह दण्डपाणिम् अपि राज्ञः अधीनं कृतवन्तः । तस्मिन् पत्रे गूढलिप्या लिखितम् आसीत् यत् अहं (दण्डपाणिः) कुशली सन् पूर्वनिर्धारितं स्थलम् आगतः अस्मि । राज्ञः अङ्गरक्षकपदं मया लभ्येत इति आशा अपि अस्ति । इतोऽपि अन्ये विचाराः यदि स्युः तर्हि कालान्तरे प्रेषयन्तु इति ।

राजा कदम्बसेनः चिन्तितवान् यत् एषः दण्डपाणिः शत्रुपक्षीयः इति । कुपितः सः आजीवनं कारागारवासदण्डं तस्मै विहितवान् । दण्डपाणिः कारागारे निक्षिप्तः जातः । धूमकेतुः वञ्चितवान् इति दण्डपाणिना अपि

न ज्ञातम् आसीत्। राजा कदम्बसेनः धूमकेतुम् आनाय्य तस्य साहाय्यं प्रशंसन् तमेव स्वस्य अङ्गरक्षकत्वेन नियुक्तवान्। कानिचन दिनानि अतीतानि ! एकदा धूमकेतुः राज्ञः रहस्यप्रकोष्ठं प्रविष्टः। तत्र राज्ञः पार्श्वे चषके पानीयम् आसीत्। राज्ञा सह वार्तालापं कुर्वन् धूमकेतुः चातुर्येण स्वस्य अङ्गुलीयके गुप्तरूपेण स्थापितं विषं पानीये योजितवान्।

ततः राजा पानीयं पातुम् उद्युक्तः। तावता अनिरीक्षितरूपेण आगतः दण्डपाणिः राज्ञः हस्ते स्थितं पानीयम् अधः पातयन् – ''महाराज ! एतत् पानीयं विषेण संयुक्तम् अस्ति। अतः कृपया मा पिबतु'' इति उक्तवान्।

''विषम् !! केन योजितम् ?'' इति राजा साश्चर्यं पृष्टवान्। ''भवतः अङ्गरक्षकं विहाय अन्यः कः एतादृशं कार्यं कर्तुं समर्थः ? धूमकेतोः अङ्गुलीयकम् उद्घाट्य पश्यतु'' इति उक्तवान् दण्डपाणिः।

परीक्षया सिद्धम् अभवत् यत् पानीयं विषसंयुक्तम् इति। तस्मिन्नेव क्षणे राजा धूमकेतोः मृत्युदण्डम् आदिशत्। सैनिकाः धूमकेतुं ततः नीतवन्तः।

राजा दण्डपाणिं पृष्टवान् – ''भवान् कारागृहात् कथं पलाय्य आगतः ? अपि च मया पातव्ये पानीये धूमकेतुः विषं योजयति इति कथं ज्ञातं भवता ? भवान् विदेशीयः गप्तचरः इति भावितम् आसीत् मया। तत् असत्यं किम् ?'' इति। ''महाराज ! अहं कारागारात् आगतः इति तु सत्यम्। अहं शत्रुराजस्य गुप्तचरः इत्यपि सत्यमेव। धूमकेतुम् अहमेव बोधितवान् यत् भवतः पानीये विषं योजनीयम् इति'' इति उक्तवान् दण्डपाणिः।

तदा राजा महता आश्चर्येण पृष्टवान् – ''प्रवृत्तं सर्वं विचित्रमिव भासमानम् अस्ति। मम वधः यदि भवता इष्टः तर्हि किमर्थं मां रक्षितवान् भवान् ?'' इति।

तदा दण्डपाणिः – ''महाराज ! प्रवृत्तं सर्वं विस्तरेण वदामि। शृणोतु। भवतः राज्यं स्वायत्तीकर्तुम् इच्छन् कलिङ्गराजः भवतः वधार्थं माम् अत्र प्रेषितवान्। अतः अहं भवतः अङ्गरक्षकः भवितुम् आगतः। किन्तु भवतः राज्ये स्थिताः शासनव्यवस्थाः मम विचारसरणिं परिवर्तितवत्यः। 'यदि एतादृशं समृद्धं राज्यं कलिङ्गराजाधीनं भवेत् तर्हि महत् अन्याय्यं भवेत्' इति मनसि निश्चित्य अहं स्वराज्यं प्रतिगन्तुम् उद्युक्तः। तावता धूमकेतुः एतादृशाय लघवे उद्योगाय मां वञ्चितवान्। एवं दुराशापीडितः जनः लोभी सन् भवतः प्राणान् अपि अपहरेत् इति विचिन्त्य तस्य दुर्बुद्धिं प्रमाणीकर्तुम् अहम् एवं नाटकं रचितवान्। अहं धूमकेतोः हितैषी इव व्यवहरन् तस्मिन् विश्वासम् उत्पाद्य तस्य साहाय्येन कारागृहात् मुक्तिम् अपि प्राप्तवान्। यथा सः भवतः पानीये विषं संयोज्य स्वेन कृते गर्ते स्वयं पतेत् तथा अहमेव तं प्रोत्साहितवान् अपि। मम प्रयत्नः सफलः जातः। मया कृतः अयं व्यवहारः प्रमादाय इति यदि भवान् मन्यते तर्हि यः कोऽपि दण्डः दीयताम्। सः मया सहर्षम् अनुभूयते'' इति सविनयं निवेदितवान्।

दण्डपाणेः वचनेन राजा स्पष्टतया ज्ञातवान् यद् दण्डपाणिः निष्कपटः सज्जनः इति। अतः सः तं सम्मान्य उक्तवान् – ''अहं भवन्तम् अङ्गरक्षकं तु करोमि एव। तेनैव सह भवन्तम् अहं मम आप्तेषु अन्यतमं भावयामि अपि'' इति। राज्ञः प्रस्तावं विनयपूर्वकमेव निराकुर्वन् दण्डपाणिः – ''महाराज ! अहं क्षन्तव्यः। भवता मयि महती कृपा दर्शिता। किन्तु अहं तदर्थं न योग्यः। यदि अहं भवता दीयमानं स्थानं स्वीकुर्यां तर्हि मया कलिङ्गराजस्य विश्वासघातः कृतः भवेत्। अङ्गीकृतायां कलिङ्गराजसेवायां भवितुम् अपि मया न शक्यते। यतः मया तस्य इच्छानुगुणं कार्यं न कृतम्। अतः देशान्तरं गत्वा यत्रकुत्रापि नूतनं उद्योगम् अन्विष्य अहं जीवितुं प्रयतिष्ये'' इति उक्त्वा ततः निर्गतः एव।

## अभिज्ञानशाकुन्तलम् ( ग्रन्थपरिचयः )

✍ **व्योम शाहः**



पुरा कवीनां गणनाप्रसङ्गे यः कविचक्रवर्ती कनिष्ठिकाम् अध्यतिष्ठत् तस्य कविशेखरस्य कविकुलगुरोः कालिदासस्य रूपकेषु एकतमम् अभिज्ञानशाकुन्तलं नाम नाटकम् आस्वादयामः।

**कृतिप्रकारः** – भासकृतरूपकेषु अविमारक-प्रतिमादिवद् इयं कृतिः रूपकाणां नाटकम् इत्याख्ये प्रकारेऽन्तर्भवति । महाभारतस्य आदिपर्वणि पद्मपुराणस्य स्वर्गखण्डे च ख्यातम् इतिवृत्तम् एतत्। इह नायकः दुष्यन्तः धीरोदात्तः। नायिका शकुन्तला कन्यका मुग्धा च। अत्र मुख्यः रसः शृङ्गारः।

**नाटकस्य स्रोतः** – नाटकस्य अस्य कथावस्तुनः मूलं महाभारतस्य आदिपर्वणि शकुन्तलोपाख्याने प्राप्यते । पद्मपुराणस्य स्वर्गखण्डेऽपि वृत्तम् एतत् प्रसिद्धं किन्तु तं स्रोतः अधिकृत्य न कालिदासेन रचितं प्रतिभाति।

**नाटकस्य अभिधानम्** – चन्द्रशेखरचक्रवर्ती स्वीयायां सन्दर्भदीपिकायां टीकायाम् इत्थं कृतेः अभिधानं योजयति – शकुन्तला–दुष्यन्त–सम्बन्धरूपम् अभिज्ञायते – स्मर्यते अनेन इति अभिज्ञानचिह्नङ्कुरीयं, तेन स्मृता शकुन्तला – अभिज्ञानशाकुन्तला। तामधिकृत्य कृतः ग्रन्थः इति अभिज्ञानशाकुन्तलम्।

**नाटके पात्राणि** – हस्तिनापुरनृपः दुष्यन्तः, माधव्यः विदूषकः, महर्षिः कण्वः इतीमे प्रमुखानि पुरुषपात्राणि। नायिका शकुन्तला। अनसूया–प्रियंवदे शकुन्तलायाः मित्रे इति प्रमुखानि स्त्रीपात्राणि।

**नाटकसारः** –

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे काले विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीश ॥१।१॥**

नान्द्यन्ते सूत्रधारेण प्रविश्य नटी निवेद्यते यत् ''कालिदासग्रथितवस्तुना नवेनाभिज्ञानशाकुन्तलं नाम्ना नाटकेनोपस्थाव्यम् अस्माभिः।'' सूत्रधारेण प्रेरिता नटी ग्रीष्मम् अधिकृत्य गीतं गायति।

अथ कदाचित् स–शर–शापः रथारूढः दुष्यन्तः मृगयार्थं वने अटति। तत्र कञ्चिद् मृगं दृष्ट्वा सूतं वेगेन चालयितुम् आज्ञप्तवान्। रथस्य वेगेन कदाचित् स मृगस्य अन्तिकं प्राप्तः। चापे शरः स्थापितः। तदैव कुतश्चिद् हिंसा–रोधकः ध्वनिः श्रुतः। कण्वशिष्यः वैखानसः तत्र समागत्य निवेदयति राज्ञे ''आश्रममृगोऽयम्। न हन्तव्यो न हन्तव्यः। – **न खलु न खलु बाणः सन्निपात्योऽयमस्मिन् मृदुनि मृगशरीरे पुष्पराशाविवाग्निः।**

क्व बत हरिणकानां जीवितं चाऽतिलोलं क्व च निशितनिपाताः सारपुङ्खाः शरास्ते॥'' दुष्यन्तः स्वीयं शरं चापं च प्रतिसंहरति।

**( समाप्तम् )**

## मासवार्त्ता:








एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं नवरात्रे संस्कृतगरबाकार्यक्रमस्य आयोजनं करोति। एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य २८ दिनाङ्के अहमदाबादनगरे, ऑक्टोबरमासस्य २ दिनाङ्के गान्धिनगरे च सम्पन्नः भव्यः संस्कृतगरबाकार्यक्रमः । संस्कृतभाषायाः प्रचाराय आयोजितेस्मिन् संस्कृतगरबाकार्यक्रमे मातुः नीराजनतः आरभ्य द्वितालगरबा, त्रितालगरबा, भाङ्गडा इत्यादीनि ५० गीतानि प्रस्तुतानि। श्रीधवलकुमारस्य धैर्या-मांकडस्य च मार्गदर्शने श्रीमती भावना रावलः, पारुल व्यासः, श्रीमती माधवी झाला, श्रीजतीन जोशी, कु. हनी रावलः च सवाद्यं सुमधुराणि गरबागीतानि अगायन् । अत्र उल्लेखनीयं यत् संस्कृतभाषायाः प्रचाराय सप्टेम्बरमासस्य २४ दिनाङ्के संस्कृतविद्याप्रतिष्ठानम्, अमदावाद-संस्कृत-एकेडेमी, नवरङ्गविद्यालयः च इत्येतेषां संयुक्तोपक्रमेण नवरङ्गविद्यालयस्य प्राङ्गणे अपरः भव्यः संस्कृतगरबाकार्यक्रमः सम्पन्नः। एतेषु त्रिषु अपि कार्यक्रमेषु त्रिसहस्राधिकाः जनाः भागम् अवहन्। त्रयः अपि कार्यक्रमाः सफलाः जाताः।

## कृपया हसन्तु

माता - (पुत्रम् उद्दिश्य) वत्स ! त्वं पठन् असि वा ?

पुत्र: - आम् अम्ब, पठन् अस्मि ।

माता - किं पठन् असि ?

पुत्र: - भोजनसूचीम् ।

★ ★ ★ ★ ★

नमन: - (मातरम् उद्दिश्य) भो: मात: । अद्य मम गृहकार्यम् अल्पमेव अस्ति ।

माता - एवं वा ? गृहकार्ये किम् अस्ति ?

नमन: - अद्य शिक्षकेण पञ्च प्रश्ना: एव प्रदत्ता: ।

माता - भवतु, तर्हि पञ्चानाम् अपि उत्तराणि सम्यक् लिखितानि खलु ?

नमन: - अहो ! प्रश्नानाम् उत्तराणि अपि लेखनीयानि आसन् ?

★ ★ ★ ★ ★

रमण: - (नमनम् प्रति) अद्य प्रात: अहं पञ्चकिलोमिटर धावितवान् ।

नमन: - शोभनम्, धावनं शरीराय योग्यमेव ।

रमण: - तत् तु योग्यमेव किन्तु जना: स्वकीयान् श्वानान् किमर्थं न बध्नन्ति ? इति अहम् अवगन्तुं न शक्नोमि ।

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**विसृज्य शूर्पवद् दोषान् गुणान् गृह्णन्ति साधव: ।**
**दोषग्राही गुणत्यागी चालनीवद् हि दुर्जन: ॥**

**तात्पर्यम्** – सज्जना: शूर्पा: यथा तथा दोषान् परित्यज्य गुणान् गृह्णन्ति । दुर्जना: चालनी यथा तथा गुणान् परित्यज्य दोषान् गृह्णन्ति ।

**विहाय पौरुषं यो हि दैवमेवावलम्बते ।**
**प्रासादसिंहवत्तस्य मूर्ध्नि तिष्ठन्ति वायसा: ॥**

**तात्पर्यम्** – य: पौरुषं विस्मृत्य दैवमेव अवलम्बेत तस्य उपरि, प्रासादस्य पुरत: विद्यमानस्य आलङ्कारिकसिंहस्य उपरि काका: यथा उपविशन्ति तथा क्षुद्रा: अधिकारं चालयेयु: ।

**वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च ।**
**अक्षीणो वित्तत: क्षीणो वृत्ततस्तु हतो हत: ॥**

**तात्पर्यम्** – प्रयत्नपूर्वकं शीलं रक्षणीयम् । धनं सकृत् आगच्छेत् । सकृत् गच्छेत् । यत: धनेन य: दरिद्र: स: न दरिद्र: । किन्तु शीलेन य: दरिद्र: स: जीवन्नपि मृतप्राय: ।

## ज्ञानसरित्

**श्यामः पटेलः**

**स्वास्थ्यस्य मित्रम् - कूष्माण्डः** - भारते केषुचित् प्रदेशेषु एकं शाकं तत्रत्याः जनाः न खादन्ति । सः अस्ति कूष्माण्डः। प्राचीनकाले यज्ञेषु बलिरूपेण पशूनां प्रयोगः भवति स्म। कालान्तरे यदा पशूनां स्थाने फलस्य प्रयोगः प्रवर्तितः जातः तदा नारिकेलस्य कूष्माण्डस्य च उपयोगः आरब्धः। किन्तु खड्गस्य प्रहारेण कूष्माण्डस्य कर्तनं पशुवधः इव भाति। तेन कारणेन शाकान्नभोजिनः जनाः कूष्माण्डमेव पशुरूपं मत्वा भोजनात् दूरीकृतवन्तः। एतस्मात् भ्रमवशात् एव स्वास्थ्यलाभान् अपि दूरीकृतवन्तः।

तथापि प्राचीनकालात् खाद्यमानः कूष्माण्डः अद्यापि बहुत्र खाद्यते। कूष्माण्डस्य नैकाः प्रजातयः विश्वे सन्ति। विश्वस्य षष्टिप्रतिशतं यावत् उत्पादनं तु चीनदेशे भारते च भवति। कूष्माण्डः वृत्ताकारः भवति। एनम् आलुकस्य स्थाने परिवर्तयितुं शक्यते। येन मधुमेहस्य रोगिणः अपि आलुकस्य शाकमिव आस्वादनं कर्तुं शक्नुयुः। कूष्माण्डस्य प्रयोगाणां वर्णनं प्राचीनेषु पाकशास्त्रीयग्रन्थेषु प्राप्यते। सम्प्रति कूष्माण्डस्य सुपः, 'पंपकिन-पाइ' तथा च 'बेक्ड डीश' अपि लोके खाद्यन्ते । क्षेत्रात् आनीतः कूष्माण्डः प्रायः चत्वारिंशत् दिनानि पर्यन्तं फ्रिज-यन्त्रं विना सुरक्षितः भवति । कूष्माण्डे मुख्यतः 'बीटा-केरोटिन' द्रव्यं भवति । यतः विटामिन-ए इति प्राप्यते । कूष्माण्डस्य बीजेषु 'आयरन', 'जिंक', 'पोटेशियम' तथा च 'मेग्नेशियम' इत्यादीनि द्रव्याणि सम्प्राप्यन्ते। कूष्माण्डस्य सेवनेन 'कोलेस्ट्रोल' इति न्यूनं भवति। शरीरस्य अन्तः शैत्यं प्रसरति। उदरस्य समस्यासु तु महौषधिरूपेण कार्यं करोति। कूष्माण्डस्य महिमानं प्रसारयितुम् एव अक्टूम्बरमासस्य षड्विंशतितमे दिनाङ्के विश्वे ''पंपकिन-डे'' इति आचर्यते। 'हेलोविन-डे' निमित्तमपि कूष्माण्डस्य प्रयोगः प्रसिद्धः अस्ति।

कूष्माण्डः – Pumpkin

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **रोगहारी** | वैद्य | physician |
| **शब्दग्रहः** | कान | ear |
| **मिष्टम्** | मीठा | sweet |
| **श्लेष्मा** | कफ | cough |
| **भूगेहः** | तहखाना | underground room |
| **श्रीदयितः** | विष्णु | Vishnu |
| **श्रीकण्ठः** | शिव | Shiv |
| **आपगा** | नदी | river |
| **पद्माकरः** | तालाब | lake |
| **गात्ररुहम्** | रोंगटे | hair on body |
| **मञ्जरी** | फूलों का गुच्छा | cluster of blossoms |
| **लोकबान्धवः** | सूर्य | sun |
| **शलाटुः** | अनपका | unripe |
| **शलभः** | टिड्डा | grass-hopper |
| **आस्फालः** | मारना | striking |

## किं भवन्तः जानन्ति ?

**१) एतेषु कस्य तुलना ध्यानस्थयोगिना सह भवति ?**

(क) शुकस्य (ख) बकस्य (ग) काकस्य (घ) हंसस्य

**२) एतेषु पार्वत्याः वाहनं किं वर्तते ?**

(क) महिषः (ख) वृषभः (ग) सिंहः (घ) अजः

**३) नन्दी कस्य वाहनं वर्तते?**

(क) कार्तिकेयस्य (ख) यमस्य (ग) धर्मराजस्य (घ) शिवस्य

**४) एतेषु कस्य शिरः गजस्य अस्ति ?**

(क) कार्तिकेयस्य (ख) अग्नेः (ग) गणेशस्य (घ) इन्द्रस्य

**५) एतेषु कः खगः 'एकाक्षः' कथ्यते?**

(क) कपोतः (ख) हंसः (ग) काकः (घ) गरुडः

**६) एतेषु गङ्गायाः वाहनं किं वर्तते ?**

(क) मत्स्यः (ख) कच्छपः (ग) मकरः (घ) श्वानः

**७) मेषः कस्य वाहनं वर्तते ?**

(क) अग्नेः (ख) वरुणस्य (ग) इन्द्रस्य (घ) सूर्यस्य

उत्तराणि – (१) ख (२) ग (३) घ (४) ग (५) ग (६) ग (७) क

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

## दीपावलीवर्गः

**(27 Oct 2025 to 5 Nov 2025)**

## संस्कृतव्याकरणम्

(Class 9-10)
8am to 9:30am
3000/-

## बालसंस्कृतवर्गः

(Class 1 to 8)
10am to 11:30am
2500/-

**Venue: Core House Ahmedabad**
**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः

**(Class SKg to 8)**
**Offline**

| | | |
|---|---|---|
| **Date** | : | 15/11/2025 to 28/3/2026 |
| **Day** | : | Saturday |
| **Time** | : | 6:00 pm to 7:30 pm (IST) |
| **Fees** | : | 4000/- |

**Venue: Core House Ahmedabad**
**contact: Dr Mihir Upadhyay, 98246 16237**

**Learn Online**

## संस्कृतभाषाशिक्षणम्

**First Level**

| | | |
|---|---|---|
| **Date** | : | 3/11/2025 to 30/1/2026 |
| **Day** | : | Mon-Wed-Fri |
| **Time** | : | 6:30 pm to 8:00 pm (IST) |
| **Fees** | : | 7000/- |

**Venue: Satva Vatika**
**Opp Randesan Metro Station Gandhinagar**
**Contact :**
**Dr. Mihir Upadhyay - (91) 098246 16237**
**Ila Joshi +(91) 063510 34630**

## संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | | |
|---|---|---|
| वार्षिकं | रू | - 100 |
| द्वैवार्षिकं | रू | - 175 |
| त्रैवार्षिकं | रू | - 250 |
| अङ्कमूल्यं | रू | - 10 |

**प्रियवाचकाः**

- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006